# संस्कृतवार्ता:

दिनाङ्क :-28.02.2025

प्रात: - 06:55

अथ वार्ताः

यूरोपीयसङ्घ-भारतयात्रा

प्रधानमन्त्री नरेन्द्रमोदी अद्य यूरोपीयसङ्घेन सह प्रतिनिधिमण्डलस्तरीयवार्तायां भागं गृह्णीयात्। यूरोपीयसङ्घस्य अध्यक्षपदासीना 'उर्सुला वॉन डेर लेयॉन' इत्येषा अद्य दिल्ल्यामेव समुपस्थिता। अवधेयं यत् 'वॉन डेर लेयॉन' इत्येषा गतदिने द्विदिवसीययात्रान्तर्गतं भारतं सम्प्राप्ता, तया सह द्वाविंशतिसंख्याका: यूरोपीयसंघ-आयुक्ता: अपि समुपस्थिता: सन्ति। यूरोपीय-सङ्घस्य आयुक्तविशेषाणाम् एषा प्रथमा भारतयात्रा वर्तते। सम्वर्द्धित-अभिसरणाधारे अनया यात्राया द्विपक्षीयसम्बन्धा: सुदृढा: भविष्यन्ति, इत्याशा संलग्ना।

जहाँ. ए-खुसरो-2025

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहलीस्थे सुन्दर-उद्याने समायोक्ष्यमाणे 'जहाँ-ए खुसरो, विंशति: पञ्चविंशति:' इत्येतस्मिन् कार्यक्रमे भागं गृह्णीयात्। भव्य-सूफी-संगीत-महोत्सवस्य सम्प्रति 'रजत-जयन्ती' वेला आमान्यते। एष: महोत्सव: 'अमीर खुसरो' इत्येतस्य भव्यनिधि-सन्निधाने समायोज्यते, यत्र अशेष-विश्वस्य सर्वोत्तमा: कलासंगीतविशिष्टसन्धारका: जना: भागं गृह्णन्ति। प्रधानमन्त्री नरेन्द्रमोदी देशस्य विविधकलासंस्कृतिसम्वर्द्धकेषु विशिष्ट प्रबलसमर्थकत्वेन गण्यन्ते। महोत्सवान्तर्गतं प्रधानमन्त्री नरेन्द्रमोदी हस्तनिर्मितवस्तूनां आपणे 'तेह' इत्यत्रापि भ्रमणं कुर्यात्, यत्र हस्त-उत्पाद-शिल्प-कलाकृतय:, लघुचलचित्राणि अपि प्रदर्शयिष्यन्ते।

राष्ट्रिय-विज्ञान-दिवस:

राष्ट्रिय-विज्ञान-दिवस: अद्य अशेषे हि देशे समायोज्यते। एष: दिवस: प्रतिवर्षं फेब्रुअरी मासस्य अष्टाविंशे दिनांके प्रसिद्ध-भौतिक-वज्ञानिकस्य 'सर-सी.वी.रमन' इत्येतस्य रमनप्रभाव-अन्वेषणोपलक्ष्ये अमान्यते। अभूतपूर्व-अन्वेषणाय 'सर सी.वी.रमन' इत्यसौ

त्रिंशदाधिक-एकोनविंशतिशततमे वर्षे नोबेल-पुरस्कारेण सभाजित: आसीत्। राष्ट्रिय-विज्ञान-दिवसावसरे सम्पूर्णे देशे नैका: विज्ञान-संचार-गतिविधय: समायोज्यन्ते। केन्द्रीय: विज्ञान प्रविधि-मन्त्री डॉ. जितेन्द्रसिंह: अद्य राष्ट्रियविज्ञानदिवस-समारोहे भागस्वीकरणं कुर्यात्। साम्प्रतिकवर्षस्य राष्ट्रियविज्ञान दिवसस्य विषयो वर्तते-विकसितभारताय विज्ञान-नवाचारयो: वैश्विक-नेतृत्वाय भारतीययूनां सशक्तिकरणम् इति।

विशेषरेलयानसंचालनम्

आगामि-होलीपर्व आलक्ष्य मध्य-रेलयान-विभागेन यात्रिणां सुगम-सुरक्षितयात्रायै अष्टचत्वारिंशत्-अतिरिक्त-विशेष-रेलयानसंचालनस्य समुद्घोषणा कृता। विशेष-रेलयानानि मुम्बई-पुणे, अथ महू-दानापुर-वाराणसी-समस्तीपुर-कन्याकुमारी-तिरुवनन्तपुरम-सहितं अन्य गन्तव्य-स्थानकेभ्य: संचालयिष्यन्ते। एतेन सह होली-विशेष-रेलयानानां समेत्य संख्या षट्सप्तति-अधिका भविष्यति।

प्रधानमन्त्री-समीक्षोपवेशेनम्

प्रधानमन्त्रिण: नरेन्द्रमोदिन: आध्यक्षे आयुषक्षेत्राय समीक्षोपवेशेनम् एकं समायोजितम्। उपवेशनावधौ प्रधानमन्त्री श्रीमोदी निवारक-स्वास्थ्यसम्वर्द्धने, औषधीय-पादपानां कृषिमाध्यमेन ग्रामीण-अर्थव्यवस्थाया: सुदृढीकरणे, पारम्परिक-चिकित्सा-सम्वर्द्धने च बलं दत्तवान्। एतस्मिन् क्षेत्रे सततविकासे वृत्त्यवसर-सर्जनविषये अपि प्रधानमन्त्री श्रीमोदी चर्चां कृतवान्।

क्रिकेट/महिलाप्रीमियरलीग

महिलानां प्रीमियर-लीग-क्रिकेट्-प्रतिस्पर्धायां गतरात्रौ बेंग्लुरू-नगरस्य एम.चिन्नास्वामी-क्रीडांगणे-समायोजिते द्वन्द्वे 'गुजरात-जायंट्स'- इत्येतेन दलेन रॉयल-चैलेंजर्स-बैंगलोर-इति दलं षट्-स्तोभपुरस्सरं पराजितम्। प्रथमं दण्डेन क्रीडयता रॉयल-चैलेंजर्स-बैंगलोर-इति दलेन सप्तस्तोभहानौ पञ्चविंशत्यधिकैकशतं धावनांका: समर्जिता:, प्रत्युत्तरे गुजरात-जायंट्स-इति दलेन सहजतया एव चतु:स्तोभहानौ लक्ष्यं समधिगतम्।

।।इति वार्ता:।।